International Journal of Sanskrit Research 2024; 10(4): 147-148

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(4): 147-148
© 2024 IJSR
www.anantaajournal.com
Received: 25-04-2024
Accepted: 27-05-2024

**Sailajanandini Jena**
Research Scholar (Ph.D),
Department of Sanskrit,
Pondicherry University,
Puducherry, India

# हरेकृष्णशतपथिविरचित “पातु नः शारदाम्बा” स्तुतिशतके शारदाम्बा वर्णनम्

**Sailajanandini Jena**

**प्रस्तावना**

देवदेवी शारदाम्बा सर्वान् पातु इति सार्वजनीनप्रार्थनानिवेदनपुरःसरं “पातु नः शारदाम्बा” नाम्ना शारदाम्बा स्तुतिशतकमिदं आचार्यशतपथिमहोदयेन विरचितम् । जगद्गुरुश्रीशङ्कराचार्यः प्रतिष्ठापित- दक्षिणाम्नाय-शृङ्गेरीपीठस्य अधिष्ठात्री देवी त्रिभुवनजननी शारदाम्बा । श्वेतहंसाधिरूढा ज्ञानमुद्रा विभूषिता इयं देवी विश्ववासिनामज्ञानान्धकारं दूरीकृत्य सर्वदा ज्ञानालोकं वितरति । परमपवित्रा तुङ्गा अस्याः पदपङ्कजयुगलं निरन्तरं प्रक्षालयति । दिनकरः सूर्यः स्वीय प्रथमकिरणैरस्याः प्रतिदिनं नीराजनां सम्पादयति । तथैव तस्या आशीर्वादेन विश्वं रचयितुं ब्रह्मा, पालयितुं विष्णुः तथा संवर्द्धयितुं शम्भुरनवरतं तस्याः सेवां कुर्वन्ति । इयं विश्वकल्याणकारिणी निखिलभक्तप्रसाददात्री माता जगद्धात्री ।भक्तानां भावविनिवेदनार्थमिदं स्तुतिपुस्तकमन्यतममाध्यमरूपेण अवश्यमुपादेयं भवितेति मत्वा तापत्रयदग्धे संसारे सर्वेषां कल्याणार्थमियं देवी जगन्माता शारदाम्बा सहायाभवतु इति कवेः प्रार्थना संसूचिता ।
मङ्गलकारिणी जगद्जननी शारदाम्बा साधूनां संरक्षणार्थं दुर्जनानां विनाशार्थं च संस्थितेति कविः सूचयति यथा –

“कल्याणार्थं प्रजानां चरति भुवि तपः क्षेत्रसिंहासनस्था
साधूनां रक्षणार्थं कलुषितमनसां नाशनार्थञ्च सिद्धा ।
स्वान्ते शान्ते समेषां सुमतिसमुदये संस्थिता या जनानां
पूज्या सा शृङ्गवन्द्या कलयतु कुशलं कीर्त्तिदा शारदाम्बा ॥”१(२)

यस्याः कृपया भूस्वर्गमेव भवति शृङ्गक्षेत्रम् । स्वर्गौकसाः देवा अपि तस्याः पादपद्मसेवां कर्त्तुं पवित्रक्षेत्रिमिदमागत्य स्वस्वकार्याणि सम्पादयितुं समर्थाः भवन्ति ।

तस्माद्धेतोः विश्वकल्याणार्थं सा शारदाम्बा सततं अस्माकं वन्दनीयेति कविः वर्णयति

“यस्याः पादाब्जसेवां कलयितुमखिलाः स्वर्गवासाश्च देवाः

**Corresponding Author:**
**Sailajanandini Jena**
Research Scholar (Ph.D),
Department of Sanskrit,
Pondicherry University,
Puducherry, India

शृङ्गक्षेत्रं पवित्रं सलिलमिह समागत्य भूस्वर्गमेव ।
नैरन्तर्य्येण पूजामवहितमनसा कुर्वते सा पराम्बा
वन्द्या नः शारदाम्बा जगति विजयतां विश्वकल्याणहेतोः
॥"[२](६)

पुनरप्युक्तं यत् ब्रह्मा- विष्णु- शम्भु- शक्र- सूर्य- चन्द्रादयाः सर्वे तत्रागत्य यस्याः जगज्जनन्याः शारदाम्बायाः करुणा संप्राप्य स्वस्वकार्येषु प्रवृत्ताः भवन्ति । यदुक्तम् -

"ब्रह्मा विष्णुश्च शम्भुर्गणपतिरथवा देवदेवश्च शक्रः
सूर्यश्चन्द्रश्च तारा निखिलखगगणा यत्र नित्यं समेत्य।
यस्याः संप्राप्य साक्षान्निरूपमकरुणां स्वस्वकार्ये प्रवृत्ताः
मान्या सा देवदेवी शमिह वितनुतां शाङ्करी शारदाम्बा
॥"[३](२३)

अन्यैकस्मिन् पद्ये भक्ति- प्रीति- प्रगत्यादिभिः शोभासम्पन्ना स्फूर्त्तिसम्भारमूर्त्तिस्वरूपा ब्रह्मस्वरूपा च शारदाम्बा जगदिदं स्वकरुणया चालयति ।
या मातृशक्तिः सर्वेषां चिरवन्दनीया –

"अस्माकं मातृशक्तिर्जगति सुविदिता सृष्टिसौन्दर्य्यसूक्तिः
भक्तिप्रीतिप्रतीति- प्रगतिविलसिता स्फूर्त्तिसम्भार मूर्त्तिः
।
सैव ब्रह्मस्वरूपा निखिलजगदिदं चालयत्यात्मरीत्या
तां भक्त्या शारदाम्बा वयमिह तनया नम्रमूर्ध्ना नमामः
॥"[४](५१)

परिशेषे कविः त्रितापजनितदुःखान्निवृत्त्यर्थं शारदाम्बायाः समीपे शरणाश्रितो भवति –

"जाने मातर्यदीह त्वदमलचरणौ भक्तिचित्तेन सेवे
सर्वत्रस्थास्तदा ते सकलसुरगणाः सुप्रसन्ना भवन्ति।
तस्मात्ते पादपद्मं प्रति शरणमहं प्राप्य याचे विनीतो
हे मातः शारदाम्ब! प्रतिपदमधुना रक्ष मां
दुःखदाहात्॥"[५](१००)

स्तुतिपुरसरं कवि श्वेतहंसवाहिनी शारदाम्बायाः साक्षात् फलदायिनी, कल्याणकारी गुणवर्ण्णनं कृतम् । तदर्थं जगद्गुरु श्रीशङ्कराचार्यः अत्र आगत्य आश्रमं कृत्वा विद्यारूपिणी जगत्जननी शारदाम्बायाः क्रोडे स्वशिष्यान् ज्ञानं प्रदातितवान् । सा देवी ब्रह्मरूपा शक्तिस्वरूपिणी ।

## सन्दर्भ **सूची**


1. पातुः नः शारदाम्बा – आचार्यहरेकृष्णशतपथी, कुलपतिः, राष्ट्रीयसंस्कृत विद्यापीठम्, तिरुपतिः, २०१६
2. पातुः नः शारदाम्बा – आचार्यहरेकृष्णशतपथी, कुलपतिः, राष्ट्रीयसंस्कृत विद्यापीठम्, तिरुपतिः, २०१६, श्लो.सं. – ६
3. पातुः नः शारदाम्बा – आचार्यहरेकृष्णशतपथी, कुलपतिः, राष्ट्रीयसंस्कृत विद्यापीठम्, तिरुपतिः, २०१६, श्लो.सं. – १००